# Bhringikrita Shiva Kshama Stotram

# ભૃઙ્ગીકૃતશિવક્ષમાસ્તોત્રમ્

## Document Information

Text title : Bhringikrita Shivakshamastotram from Shivarahasa

File name : bhRingikRitashivastotram.itx

Category : shiva, stotra, shivarahasya

Location : doc_shiva

Author : Traditional

Transliterated by : DPD

Proofread by : DPD, Ruma Dewan

Description-comments : shrIshivarahasyam | shivAkhyaH chaturthAMshaH | adhyAyaH 10 | 154 ||

Latest update : August 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2023

*sanskritdocuments.org*

# ભૃઙ્ગીકૃતશિવક્ષમાસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે)

સ્કન્દઃ —

હૃષ્ટાં દેવીં તદા વીક્ષ્ય ભૃઙ્ગિઃ સામ્બં મહેશ્વરમ્ ।
તુષ્ટાવ દેવ્યા દેવેશં સ ભૃઙ્ગી વિનયાત્ સદા ॥ ૧॥

ભૃઙ્ગી —

- -

ક્રૂરં દુષ્ટતમં વિનષ્ટમનસં ભ્રષ્ટં શઠં નિષ્ઠુરં
નિર્લજ્જં કૃપણં કૃતઘ્નમશુચિં બહ્વાશનં હિંસકમ્ ।
આશાપાશશતપ્રબન્ધમનસં દુષ્કીર્તિભાજં જડં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨॥

ક્ષુદ્રં દુર્ભગમલ્પસત્વમલસં ભગ્નવ્રતં રાગિણં
ભીરું ડામ્ભિકપક્ષમં વ્યસનિનં પાપાત્મકં સૂચકમ્ ।
આધિવ્યાધિનિપીડિતં જડધિયં સદ્ભિઃ સદા નિન્દિતં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩॥

મૂર્ખં બાલમતિં સ્વધર્મરહિતં ધર્માર્થહીનં ખલં
કામાન્ધં ક્ષણિકં તદર્થનપરં દૌઃશીલ્યજન્મસ્થલમ્ ।
સર્વલુબ્ધમસત્યનિષ્ઠમધમં પ્રજ્ઞાયશોવર્જિતં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪॥

આકાઙ્ક્ષાશયમાર્યવૃત્તિવિમુખં ક્ષીણં ગુરુદ્વેષિણં
ધૂર્તં દુર્ગુણમત્યશુદ્ધહૃદયં સર્વત્ર સન્દેહિનમ્ ।
દીનં પાપરતં સમસ્તવિષયેષ્વાસક્તમન્યાયિનં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫॥

સ્વપ્નેઽપ્યુત્તમગન્ધપુષ્પનિકરૈરીશાર્ચનાવર્જિતં
ધયાનધ્યેયવિચારણાવિરહિતં તુચ્છં સદોચ્છૃઙ્ખલમ્ ।

દારિદ્ર્યાસ્પદમાત્મવૈરિવિશગં તાપત્રયસ્યાસ્પદં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૬॥

માયાગ્રસ્તસમસ્તવૃત્તિકુશલં સત્સઙ્ગવિદ્વેષિણં
દુઃસઙ્ગપ્રિયમપ્રતિષ્ઠવચનં કામાતુરં તસ્કરમ્ ।
શૈવજ્ઞાનપરાઙ્ગમુખં ખલજનવ્યાપારપારં ગતં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૭॥

દુર્મર્યાદમતિપ્રવૃદ્ધજરસં (રજસં) સદ્વૃત્તિસેવારિપું
સદ્ધર્માદિસમુત્સુકે ગુરુજને માન્યેષુ ચાત્યુદ્ધતમ્ ।
શિષ્ટાનિષ્ટકરં ક્રિયાપરિચિતં દુષ્ટપ્રતુષ્ટિપ્રદં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૮॥

કર્માદિસ્તુતિકારણં પરમહાનિન્દાકરં નિન્દિતં લુણ્ટાકં
પતિતં વિપર્યયગતસ્વાન્તં સદા યાચકમ્ ।
વૈકલ્યાપગતં સુકાર્યનિચયં સર્વાપદાં સઞ્ચયં
(વૈકલ્યાપગતાશુકાર્યનિચયં સર્વાપદાં સઞ્ચયં)
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૯॥

કૃત્યાકૃત્યવિચારવર્જિતમતિં વ્રાત્યં મહાકાતરં
દુર્બુદ્ધિં મદપાનમત્સરધિયં દુર્વૃત્તવૃત્ત્યાશ્રયમ્ ।
મિથ્યાજ્ઞાનિનમાત્માત્મકણ્ટકમલં લોકત્રયે નિન્દિતં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૦॥

દુષ્કર્મપ્રચયપ્રભિન્નહૃદયં ક્લેશૈશ્ચ સમ્પિડિતં
ચાર્વાકં કુમતિં કુશીલમનસં કાર્પણ્યજન્મસ્થલમ્ ।
ભાર્યાપુત્રગૃહાદિસક્તમનસં ગામ્ભીર્યધૈર્યદ્વિષં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૧॥

આત્મજ્ઞાનવિહીનમાત્મવિમુખં સર્વાત્મભાવદ્વિષં
સંકલ્પૈર્બહુભિર્વિભિન્નહૃદયં દ્વૈતપ્રસક્તં સદા ।
મર્મચ્છિદ્વચનં કઠોરહૃદયં મિત્રદ્રુહં ક્ષુદ્રકં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૨॥

ચિત્તક્ષોભકરં કલત્રહૃદયં શઙ્કાપદં લોલુપં
સારાસારવિચારહીનમનસં નીચક્રિયં નીરસમ્ ।
મત્તોન્મત્તનિકૃષ્ટદુષ્ટચરિતં શોચ્યં વૃથાલાપિનં

કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૩॥

સત્યત્યાગદયાક્ષમાશમદમાદ્યર્થાનભિજ્ઞાનકં
દેવબ્રાહ્મણગોત્રજાતિતિથિપિતૃજ્ઞાનાત્મકાપૂજનમ્ ।
વિશ્વસ્તેષ્વપકારવઞ્ચનપરૈર્મૈત્રીપરં દુર્જયં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૪॥

મત્વાઽધર્મમતિં કદર્થનપરં કો મત્સમોઽસ્મિન્
ભવેદિત્યેવં બહુજલ્પિનં કુવપુષં પાપાશ્રિતં રાક્ષસમ્ ।
દૃષ્ટ્વા દૃષ્ટસુખેષણં તવ મદાત્ત્યક્ત્વા શિવારાધનં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૫॥

દુષ્પૂરસ્વકકુક્ષિપૂરણપરં ભારં ભુવઃ કેવલં
દાસીમેપખરસ્વભાવમપટું સમ્માનનાભાજનમ્ ।
રિક્તં બાલમદીર્ઘસુત્રિણમલં હૃચ્છલ્યભૂતં સતાં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૬॥

માર્જારાખુવૃકશ્વકુક્કુટકપિક્રોડાભિવૃત્તિં સદા
તીર્થધ્વાંક્ષમનર્થકમ્પિનિ હિતે સન્તાપિનં દુઃસહમ્ ।
ત્યક્તોપાયમપાયકાઙ્ક્ષિણમહોઽશુદ્ધપ્રિયં ચાપલં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૭॥

અસ્પૃશ્યં વિકલં કર્દયમખિલૈઃ દોષૈઃ સ્વકીયૈર્યુતં
પાપિષ્ઠં વિષયેષુ સક્તમનસં ત્યાજ્યં વિવાદાસ્પદમ્ ।
ચિન્તાશોકપરીતચેતસમલં સર્વાશુભાનાં પદં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૮॥

અત્યાવેશનમુત્તમસ્થિતિમતાં સત્યાગ્નિનાં નાસ્તિકં
રન્ધ્રાન્વેષણમન્ધમૂકબધિરં શમ્ભોસ્તુ વિશ્વાત્મનઃ ।
માહાત્મ્યશ્રવણસ્તુતિક્ષણવિધૌ માહેશ્વરાવત્સલં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૯॥

ભ્રષ્ટં સર્વજુગુપ્સિતં પરહિતવ્યાઘાતિનં તામસં સમ્ભ્રાન્તં
ચપલં વિચારવિહિતવ્યાપારવિદ્વેષણમ્ ।
શમ્ભો ત્વત્પદભક્તિહીનમનસં મૂઢં સમાત્મદ્વિષં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૦॥

દોષાવાસમતિં પ્રમાદિતમતિં ક્ષુત્તૃડ્જ્વરાભ્યર્દિતં
 સ્વપ્નેઽપ્યત્ર પરોપકારરહિતં સર્વાહિતં દુર્બલમ્ ।
લોકે સત્પરિહાર્યનિન્દિતમહાદુઃખપ્રદૈકેન્દ્રિયં
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૧॥

કિં વાચા બહુવિસ્તરેણ ભગવન્ મત્સન્નિભો ભૂતલે
 ભૂતો નાસ્તિ વિભો ભવિષ્યતિ પુમાન્નિર્ભાગ્યચૂડામણિઃ ।
તસ્માદીદૃશમાત્મવઞ્ચનપરં ત્રૈલોક્યરક્ષામણે
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૨॥

સર્વશ્રેષ્ઠગુણૈકભાજનમહો સર્વોત્તમેષૂત્તમં
 સઙ્ખ્યેયાર્થગુણૈકભાજનમલં કષ્ટાતિકષ્ટપ્રિયમ્ ।
શ્રીકાશ્રીકમતેન્દ્રિયસ્ય વશગં નિઃસંશયં સઙ્ગિનં
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૩॥

વિણ્મૂત્રક્રિમિમાંસશોણિતમયં મેદોઽસ્થિમજ્જાત્મકં
 દુર્ગન્ધૈકનિધિં જરાપરિગતં વાતાદિદોષાસ્પદમ્ ।
દૃષ્ટ્વાઽપિ સ્વકલેવરં કૃશમયં તવારિક્તં પશું
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૪॥

વિષ્ઠાવિષ્ટકુજન્તુનિષ્ઠમશુચિં સ્વાભાવ્યતો નશ્વરં
 કુષ્ઠક્ષૌણ્યવિષૂચિકાજ્વરશિરઃ શૂલાદિવેગાસ્પદમ્ ।
જ્ઞાત્વાઽપિ સ્વશરીરમત્ર તુ સદા સમ્પ્રીતિયુક્તં પશું
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૫॥

સ્વાત્માધારતયા સ્થિતાં નિજતનું બાલ્યે તથા યૌવને
 વૃદ્ધત્વેઽપિ બહુપ્રકારવિકૃતિં પ્રાપ્તાં સમીક્ષ્યાપિ ચ ।
તત્રાત્મન્યતિરાગિણં ત્વયિ કૃતે સ્વાન્યાનુરક્તં પશું
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૬॥

દેહં ક્ષાલનલેપનાદિવિધિના સંસ્પૃશ્ય યોગ્યાર્થવત્
 છિન્નં ક્લિન્નમહાવ્રણં નવમુખં નિત્યં સ્રવન્તં મલમ્ ।
તં દૃષ્ટ્વાઽપ્યતિરાગિણં ચ નરકે નૂનં સરાગં પશું
 કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૭॥

લોકેઽત્યન્તપવિત્રતામુપગતં યત્પઞ્ચગવ્યાદિકં
 તદ્દેહોત્થકફાસ્થિરોમરુધિરસ્નાય્વાદિસંસ્પર્શતઃ ।

સ્યાદેવાશુચિ તદ્વિબુધ્ય ચ સદા તદ્દેહસક્તં પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૮॥

સ્વસ્યાર્યુનિચયસ્ય મધ્યત ઇમૌ નિત્યં નિશાવાસરૌ
    જાગ્રત્સ્વપ્નસુષુપ્તિષુ સ્થિતિમતઃ સ્વલ્પાયુષઃ ખણ્ડકમ્ ।
ગચ્છત્તાવદબુદ્ધ્ય ચ સ્વહિતસત્કર્મણ્યરક્તં પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૯॥

સર્પિઃખણ્ડપયોમધુપ્રભૃતિકં ત્યક્ત્વા તૃણાન્યપિ ગૌઃ
    યદ્વચ્છાશ્વતશામ્ભવોક્તમહિમાનન્દાનપેક્ષં સદા ।
શમ્ભો વૈષયિકે સુખેઽતિવિરસે તુચ્છેઽતિસક્તં પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૦॥

ધૂમે કુઙ્કુમગન્ધકાઙ્ક્ષિણમહો તોયાર્થિનં વા મરૌ
    તૈલાન્વેષિણમશ્વચૂતણનિચયે મૈત્ર્યર્થિનં દુર્જને ।
દુર્બુદ્ધિં ત્રિગુણાત્મકે મલનિધૌ ક્ષેત્રે સુખેપ્સું પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૧॥

દેવાનામપિ મારુતસ્ય ચ વિભો ગમ્યં ન યત્તત્ર તુ
    સ્વૈરં ગચ્છતિ મે મનો નહિ તદા ચિત્તં તવાઙ્ઘ્રિદ્વયે ।
ધર્તુસ્તચ્ચ નિયન્તુમુચ્ચસુખદો નૈવાસમર્થં પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૨॥

વેદૈરપ્યખિલૈર્મહેશ બહુશો વેદાન્તશાસ્ત્રાદિભિઃ
    વ્યાપિ ચિન્મય એક ઈશ્વર ઇતિ પ્રોક્તે ત્વયિ ત્વત્પદે ।
ચિત્તં ધર્તુમશક્તમાત્મવચનૈઃ વ્યાપારહીનં પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૩॥

જ્ઞાનાજ્ઞાનદયાદયાશમદમાસંમોહમોહાનતિખ્યાત્યખ્યાતિ
    ભયાભયાસુખસુખાહિંસામનસ્તુષ્ટયઃ ।
ભૂતનાં ભવદાજ્ઞયૈવ વિધિના નિત્યં ભવન્તિ ધ્રુવં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૪॥

ભાવાભાવભવાભવામૃતવિષાસત્સત્સમસ્તા ક્રિયા
    દિવ્યત્વં ચ નિરામયત્વનિખિલાભીષ્ટાર્થસમ્પત્તયઃ ।
ભૂતાનાં ભવદિચ્છયૈવ ભગવન્ જાયન્ત એવાનિશં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૫॥

યોગૈશ્વર્યસમસ્તદાનપરતા શ્રદ્ધાત્મભક્તિર્દૃઢા
　　વૈરાગ્યં પરમં મહેશ પરમે ધર્મે મતિશ્ચારુતા ।
ભૂતાનાં ભવતઃ પ્રસાદત ઇમે જાયન્ત એવ ધ્રુવં
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૬॥

નાલં ચાલયિતું તૃણં ચ પવનઃ શમ્ભો ત્વદાજ્ઞાં વિના
　　દગ્ધું તં ન સમર્થ એવ હુતભુક્શક્રોઽપિ નો વ્રજતઃ ।
શક્તઃ છેત્તુમપિ પ્રભો જગદિદં સર્વં ત્વદાજ્ઞાવશં
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૭॥

ચિત્તં ચેતયતે મનશ્ચ સકલં સઙ્કલ્પયત્યાજ્ઞયા
　　સર્વાર્થાનભિમન્યતે નનુ મહાદેવાજ્ઞયાઽહઙ્કૃતિઃ ।
સ્વે સ્વે ત્વિન્દ્રિયવર્ગ એવ વિષયેચ્છાસ્તે તવૈવાજ્ઞયા
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૮॥

બ્રહ્મા સૃષ્ટિકરો હરિઃ સ્થિતિકરો રુદ્રસ્તુ કાલાત્મકઃ
　　સંહર્તા જગતં શ્રિયં જનયતિ શ્રીયુગ્મવિદ્યાં પુમાન્ ।
ગાયત્રી ચ તવાજ્ઞયૈવ નરકાત્સન્તારયત્યાશ્રિતાન્
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૯॥

વાયુર્વાતિ તવાજ્ઞયા શશિરવી નિત્યં જગદ્ભાસકૌ
　　આહારં પચતે ચ કુક્ષિસદને વહ્નિઃ સદ પ્રાણિનામ્ ।
દેવાનાં વહતીવ હવ્યમઽપિ યઃ પાકં કરોત્યત્તિ યઃ
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૦॥

ભૂતાન્યાપ ઇહાજ્ઞયૈવ ભવતઃ સઞ્જીવયન્તિ પ્રભો વાચા
　　વાગ્વિપુલં દદાતિ જગતાં યત્તેખિલં પુન્નભઃ ।
ભૂતાનામવકાશદં ત્રિજગતાં શીતોષ્ણશઙ્કાસ્પદઃ
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૧॥

સેન્દ્રાઃ સર્વસુરાસુરાદય ઇહ ત્વચ્છાસને સંસ્થિતાઃ
　　બ્રહ્માણ્ડાનિ ઇહાત્મવસ્તુનિ પરે સન્ધારકાઃ સન્તતમ્ ।
ત્રૈલોક્યાનુગતાનપીહ સુબહૂન્યાજ્ઞાવશાદેવ તે
　　કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૨॥

હર્તાસૌ મહદાદિકં પ્રકૃતિરપ્યાજ્ઞાવશા તે વિભો

કાલશ્ચ પ્રકૃતિઃ પુરુઃ પુરુષ ઇત્યેતત્ત્રયં સર્વદા ।
શમ્ભો દેવ ભવ ત્વમેવ ચ તથા ભૂતં ભવિષ્યદ્ભવં
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૩॥

ત્વયોપરિ તમો ધૃતં તવ મહાબ્ધિલીલાર્થમેવ
ત્વયોન્નતિપ્રેરણયૈવ તે તચ્ચ વિષયેષ્વત્ર પ્રવૃતં જગત્ ।
તાપશ્ચાપિ રવેઃ સમસ્તજગતાં દુઃખાર્તિહારિન પ્રભો
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૪॥

બન્ધચ્છેદવિધૌ ત્વમેવ ભુવનેષ્વેકઃ સમર્થો ભવેઃ
ત્વં પાશૈર્ભવબન્ધમેતદખિલં કર્મચ્છલેનાપિ ચ ।
શમ્ભો ત્વાં શરણાગતં કરુણયા ત્વં શઙ્કરો યેન વા
કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૫॥

મહામુર્તે મહાદેવ ત્વન્મૂર્તૌ સર્વદેવતાઃ ।
યથા બીજાઙ્કુરોત્પત્તિઃ તથેદં ત્વય્યવસ્થિતમ્ ॥ ૪૬॥

જગજ્જાલમિદં શમ્ભો સસુરાસુરમાનુષમ્ ।
નિત્ય નિર્માય નીરૂપ ધુરન્ધર સુનિર્મલમ્ ॥ ૪૭॥

મનોવાચાં સુદૂરાત્મન્ પરમેશ નમોઽસ્તુ તે ।
ત્વત્તઃ સર્વં ત્વયા સર્વં ત્વં સર્વં સર્વગોઽસિ ચ ॥ ૪૮॥

નમસ્તે દેવદેવેશ સર્વકારણકારણ ।
કર્તવ્ય ચ દયા દિને કરુણાકર શઙ્કર ॥ ૪૯॥

સર્વાપરાધં મે દેવ ક્ષમસ્વ જગતાં પતે ।
તવ રૂપં જગચ્છમ્ભો અષ્ટમૂર્તિરનીશ્વરઃ ॥ ૫૦॥

પિતા ત્વમેવ ભગવન્ માતા સાક્ષાદુમા યતઃ ।
ક્ષમસ્વાગો મમેદ નીં બહુનોક્તેન કિં પ્રભો ॥ ૫૧ ॥

ત્વયિ ભક્તિં મહાદેવ દૃઢાં દેહિ મૃડાવ્યય ॥ ૫૨॥

- -

સ્કન્દઃ —

ઇત્યુક્તાં મુનિવચનસ્તુતિં મહેશઃ
શ્રુત્વા ચાગકુમારિકાયુતો હરસ્તમ્ ।
દત્વા રૂપમપારદિવ્યગણપસ્યેન્દ્રાધિપત્યં દદૌ

તેનૈવોત્તમસદ્વિજેન વિહરત્કૈલાસમૌલૌ શિવઃ ॥ ૫૩॥

યસ્ત્વેતચ્છૃણુયાત પઠેન શમ્ભોઃ
 સ્તવ્યાનાં પરમઃ સ્તવોઽયમીશતુષ્ટ્યૈ ।
સોઽન્તે ચાપ્યચિરેણ ભૃઙ્ગિતુલ્યઃ
 પાદાબ્જે પરમેશ્વરસ્ય યુક્તભૃઙ્ગઃ ॥ ૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવાખ્યે ભૃઙ્ગીકૃતશિવક્ષમાસ્તોત્રં સપૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૧૦ । ૧-૫૪ ॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 10 . 1-54 ..

Notes:
Mahāmuni Bhṛṅgī મહામુનિ ભૃઙ્ગી (who had avoided circumambulation of Devī દેવી in favour of Śiva શિવ) on being advised by Devī દેવી about the oneness of Śiva શિવ and Herself; expresses his remorsefulness. He beseeches Śiva Paśupati શિવ પશુપતિ to show compassion as a Father, and pardon him for his misconduct that arose due to his ignorance.

Encoded by DPD
Proofread by DPD, Ruma Dewan

*Bhringikrita Shiva Kshama Stotram*
pdf was typeset on August 17, 2023

Please send corrections to *sanskrit@cheerful.com*